इति रूढ़ ।) नारीविशेषः । इति मुग्धबोध-
व्याकरणम् ॥ (यथा, माघे । ८ । २४ ।
"त्रस्यन्ती चलशफरीविघट्टितोरू-
र्वामोरूरतिशयमाप विभ्रमस्य ।
क्षुभ्यन्ति प्रसभमहो विनापि हेतो-
र्लीलाभिः किमु सति कारणे तरुण्यः ॥")
वायकः, पुं, (वयतीति । वे + ण्वुल् ।) समूहः ।
इति शब्दचन्द्रिका ॥ (तन्तुवायः । यथा, भाग-
वते । ५ । २६ । ३६ ।
"यत्र ह वित्तग्रहं पापपुरुषं धर्म्मराजपुरुषा
वायका इव सर्व्वतोऽङ्गेषु सूत्रैः परिवयन्ति ॥")
वायदण्डः, पुं, (वायस्य दण्डः । यद्वा, वायतेऽनेनेति
वायः । वाय एव दण्ड इति कर्म्मधारयः ।)
वापदण्डः । इति भरतद्विरूपकोषः ॥
वायनं, क्ली, पिष्टकविशेषः । तत्पर्य्यायः । शतो-
पायनम् २ । प्रहेणकम् ३ । इति त्रिकाण्ड-
शेषः ॥
वायवी, स्त्री, (वायोरियमिति । वायु + अण् ।
ङीप् ।) उत्तरपश्चिमदिक् । इति जटाधरः ॥
(कार्त्तिकेयस्यानुचरमातृगणभेदः । यथा, महा-
भारते । ९ । ४६ । १७ ।
"वायव्यश्चाप कौमार्य्यो ब्राह्मयश्च भरतर्षभ ! ।
वैष्णव्यश्च तथा सौर्य्यो वाराह्यश्च महाबलाः ॥")
वायव्यं, त्रि, (वायुर्देवतास्येति । वायु + "वाय्वृतु-
पित्रुषसो यत् ।" ४ । २ । ३१ । इति यत् ।)
वायुसम्बन्धिदिगादि । यथा । विल्वयुग्मसुपक्रम्य
गवाघतन्त्रे ।
"वायव्यस्यां नैरृतस्यां न खनीयात् कदाचन ॥"
इति तिथ्यादितत्त्वम् ॥
(वायुदेवताकपशुहविरादि । यथा, ऋग्वेदे ।
१० । ९० । ८ ।
"तस्माद्यज्ञात् सर्व्वहुतः सम्भृतं पृषदाज्यम् ।
पशूंस्तांश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये ॥"
"वायव्यान् वायुदेवताकान् ।" इति तद्भाष्ये
सायणः ॥ * ॥ क्ली, षट्शताधिकचतुर्विंशति-
सहस्रश्लोकात्मकवायुनामकमहापुराणम् । यथा,
देवीभागवते । १ । ३ । ७ ।
"अयुतं वामनाख्यञ्च वायव्यं षट्शतानि च ।
चतुर्विंशतिः संख्यातः सहस्राणि तु शौनक ! ॥"
अस्त्रविशेषः । यथा, महाभारते ।१।१३६।१९।
"आग्नेयेनासृजद्वह्निं वारुणेनासृजत् पयः ।
वायव्येनासृजद्वायुं पार्जन्येनासृजद्घनान् ॥")
वायसः, पुं, (वयते इति । वय गतौ । "वयश्च ।"
उणा॰ ३ । १२० । इति असच् । स च णित् ।)
अगुरुवृक्षः । श्रीवासः । काकः । इति मेदिनी ।
से, ३८ ॥ (यथा, महाभारते । ३ ।२७० ।११ ।
"श्वगृध्रकङ्ककाकोलभासगोमायुवायसाः ।
अतृप्यंस्तत्र वीराणां हतानां मांसशोणितैः ॥")
अस्योत्पत्तिर्यथा,—
"अरुणस्य भार्य्या श्येनी वीर्य्यवन्तौ महा-
बलौ ।
सम्पातिश्च जटायुश्च प्रभूतौ पक्षिसत्तमौ ।
सम्पातिर्जनयन् शशान् काकाः पुत्रा जटायुषः ॥"
इति वह्निपुराणे वाराहप्रादुर्भावः ॥ * ॥
अस्य एकाक्षिनाशकारणं यथा,—
मार्कण्डेय उवाच ।
"गते तु भरते तस्मिन् रामः कमललोचनः ।
लक्ष्मणेन सह भ्रात्रा भार्य्यया सीतया सह ।
शाकमूलफलाहारो विचचार महावने ॥
एकदा लक्ष्मणस्तत्र रामदेवः प्रतापवान् ।
चित्रकूटे वने देशे वैदेह्या अङ्कमाश्रितः ॥
सुष्वाप सुसुखेनैव ततः काको दुरात्मवान् ।
सीताभिमुखमभ्येत्य विददार स्तनान्तरम् ।
विदार्य्य वृक्षमारुह्य स्थितोऽसौ वायसाधमः ॥
ततः प्रबुद्धो रामोऽसौ दृष्ट्वा रक्तं स्तनान्तरम् ।
शोकाविष्टान्तु सीतां तामुवाच कमलेक्षणः ॥
किमिदं स्तनान्तरे भद्रे तव रक्तस्य कारणम् ।
इत्युक्ता सा च तं प्राह भर्त्तारं विनयान्विता ॥
पश्य राजेन्द्र वृक्षाग्रे वायसं दुष्टचेष्टितम् ।
येनैतच्च कृतं कर्म्म सुप्ते त्वयि महामते ॥
रामोऽपि दृष्ट्वा तं काकं तस्मिन् क्रोधमथा-
करोत् ।
ऐषिकास्त्रं समादाय ब्रह्मास्त्रेणाभिमन्त्रितम् ॥
काकमुद्दिश्य चिक्षेप सोऽवधावद्भयान्वितः ॥
स त्विन्द्रस्य सुतो राजन् इन्द्रलोकं विवेश ह ।
रामास्त्रं प्रज्वलं दीप्तं तस्यानुप्रविवेश वै ॥
विदितार्थश्च देवेन्द्रो देवैः सर्व्वैः समन्वितः ।
निष्क्रामयच्च तं दुष्टं राघवस्यापकारिणम् ॥
ततोऽसौ सर्व्वदेवैस्तु देवलोकाद्बहिष्कृतः ।
पुनः सोऽभ्येत्य रामञ्च राजानं शरणं गतः ॥
त्राहि राम महाबाहो अज्ञानादपकारि-
णम् ।
इति ब्रुवन्तं स प्राह रामः कमललोचनः ॥
अमोघाय ममास्त्राय अक्षि एकं प्रयच्छ मे ।
ततो जीवसि दुष्टात्मन् मेऽपराधो महान् कृतः ॥
इत्युक्तोऽसौ स्वकं नेत्रमेकमस्त्राय दत्तवान् ।
अस्त्रञ्च नेत्रमेकन्तु भस्मीकृत्य शमं ययौ ॥
ततः प्रभृति सर्व्वेषां काकानामेकनेत्रता ।
चक्षुषैकेन पश्यन्ति हेतुनानेन पार्थिव ! ॥"
इति नरसिंहपुराणे ४३ अध्यायः ॥
(वायससम्बन्धिनि, त्रि । यथा, महाभारते ।
१२ । ८२ । ७—८ ।
"स काकं पञ्जरे बद्ध्वा विषयं क्षेमदर्शिनः ।
सर्व्वं पर्य्यचरद्युक्तः प्रवृत्त्यर्थी पुनः पुनः ॥
अधीध्वं वायसीं विद्यां शंसन्ति मम वायसाः ।
अनागतमतीतञ्च यच्च संप्रति वर्त्तते ॥")
वायसादनी, स्त्री, (वायसेन अद्यते इति । अद
+ कर्म्मणि ल्युट् + ङीप् ।) महाज्योतिष्मती ।
काकतुण्डी । इति राजनिर्घण्टः ॥
वायसारातिः, पुं, (वायसस्य अरातिः ।) पेचकः ।
इत्यमरः । २ । ५ । १५ ॥
वायसाह्वा, स्त्री, (वायसस्य आह्वा नाम
यस्याः ।) काकनामा । काकमाची । इति
राजनिर्घण्टः ॥
वायसी, स्त्री, (वायसानामियमिति तत्प्रियत्वात् ।
वायस + अण् । ङीप् ।) काकोडुम्बरिका ।
काकमाची । इति मेदिनी । से, ३८ ॥ महा-
ज्योतिष्मती ॥ काकनामा । काकतुण्डी । इति
राजनिर्घण्टः ॥
वायसेक्षुः, पुं, (वायसानामिक्षुरिव प्रियत्वात् ।)
काशः । इति राजनिर्घण्टः ॥
वायसोलिका, स्त्री, (वायसोली + स्वार्थे कन् ।)
काकोली । इति शब्दरत्नावली ॥
वायसोली, स्त्री, (वायसान् ओलण्डयतीति ।
ओलडि उत्क्षेपे + "अन्येष्वपि दृश्यते ।" इति
डः । शकन्ध्वादित्वात् अस्य लोपः ।) काकोली ।
इत्यमरः । २ । ४ । १४४ ॥
वायुः, पुं, (वातीति । वा गतिगन्धनयोः + "कृवा-
पाजिमिस्वदिसाध्यशूभ्य उण् ।" उणा॰ १ । १ ।
इति उण् । "आतो युक् चिण्कृतोः ।" ७ । ३ ।
३३ । इति युक् ।) उत्तरपश्चिमकोणाधिपतिः ।
वाति यः । वातास इति भाषा । स च
पञ्चभूतान्तर्गतभूतविशेषः । तद्विशेषविवरणं
यथा । वायवः प्राणापानव्यानोदानसमानाः ॥
प्राणो नाम प्राग्गमनवान् नासाग्रस्थानवर्त्ती ।
अपानो नाम अवाग्गमनवान् पाय्वादिस्थान-
वर्त्ती । व्यानो नाम विष्वग्गमनवानखिलशरीर-
वर्त्ती । उदानः कण्ठस्थानीय ऊर्द्ध्वगमनवानुत्-
क्रमणवायुः । समानः शरीरमध्यगताशित-
पीतान्नादिसमीकरणकरः । समीकरणन्तु परि-
पाककरणं रसरुधिरशुक्रपुरीषादिकरणम् ।
केचित्तु नागकूर्म्मकृकरदेवदत्तधनञ्जयाख्याः
पञ्चान्ये वायवः सन्तीत्याहुः । तत्र नागः
उद्गिरणकरः । कूर्म्मः निमीलनादिकरः ।
कृकरः क्षुधाकरः । देवदत्तः जृम्भणकरः ।
धनञ्जयः पोषणकरः । एतेषां प्राणादिष्वन्त-
र्भावात् प्राणादयः पञ्चैवेति केचित् ॥ इदं
प्राणादिपञ्चकं आकाशादिगतरजोऽंशेभ्यो
मिलितेभ्य उत्पद्यते । इदं प्राणादिपञ्चकं
कर्म्मेन्द्रियसहितं सत् प्राणमयकोषो भवति ।
अस्य क्रियात्मकत्वेन रजोऽंशकार्य्यत्वम् । एतेषु
कोषेषु मध्ये विज्ञानमयो ज्ञानशक्तिमान् कर्त्तृ-
रूपः । मनोमय इच्छाशक्तिमान् करणरूपः ।
प्राणमयः क्रियाशक्तिमान् कार्य्यरूपः । इति
वेदान्तसारः ॥ तत्पर्य्यायः । श्वसनः २ स्पर्शनः
३ मातरिश्वा ४ सदागतिः ५ पृषदश्वः ६ गन्ध-
वहः ७ गन्धवाहः ८ अनिलः ९ आशुगः १०
समीरः ११ मारुतः १२ मरुत् १३ जगत्प्राणः
१४ समीरणः १५ नभस्वान् १६ वातः १७
पवनः १८ पवमानः १९ प्रभञ्जनः २० । इत्य-
मरः ॥ अजगत्प्राणः २१ खश्वासः २२ वाहः
२३ धूलिध्वजः २४ फणिप्रियः २५ वातिः २६
नभःप्राणः २७ भोगिकान्तः २८ स्वकम्पनः २९
अक्षतिः ३० कम्पलक्ष्मा ३१ शसीनिः ३२
आवकः ३३ हरिः ३४ । इति शब्दरत्नावली ॥
वासः ३५ सुखाशः ३६ मृगवाहनः ३७ सारः